भेदे। त्रिककुभोऽप्यत्र। त्रिककुबध्यर्द्धः पृष्ठ्यः। महात्रिककुप् व्यूढो नवरात्रः। समूढस्त्रिककुप्समूढः" आश्व० श्रौ०१०। ३।२१ नवरात्र इत्यनुवर्त्तते,नारा० "चतुष्टोम त्रिककुबवध्यर्द्धोऽभिप्लवः एतैश्चतुर्भिः स्वानां श्रैष्ठ्यकामो यजेत। २२ एतैस्त्रिककुम्महात्रिककुप्समूढस्त्रिककुप्चतुष्टोमत्रिककुब्भिः स्वानां श्रैष्ठ्यकामो यजेत। एतेषां दशमो वैश्वानर एव भवति। कामस्तु तेषामेकैकेन सम्बध्यते" नारा०।

**त्रिककुब्धामन्** पु० मूर्द्धोमध्याभेदेन त्रिसृणां ककुभां दिशां समाहारः त्रिककुब् तत् धाम आश्रयो यस्य। विष्णौ विष्णुस०। [ गोक्षुरवृक्षे शब्दर०।

**त्रिकट** पु० त्रीन् वातादिदोषान् कटति आवृणोति अच्।

**त्रिकटु** न० त्रयाणां कटुरसानां समाहारः। मिलितेषु शुण्ठीपिप्पलीमरिचेषु हेम०। "विश्वोपकुल्यामरिचं त्रयं त्रिकटु कथ्यते। कटूष्णं दीपनं हन्ति श्वासकास त्वगामयान्। गुल्ममेहकफस्थौल्य मेदश्लीपदपीनसान्" भावप्र०।

**त्रिकण्ट** पु० त्रयः कण्टाः कण्टका अस्य।१गोक्षुरे २स्नुहीवृक्षे, च रत्नमा०(टेङ्गरा)३मत्स्यभेदे शब्दर०।४पलगुल्म शब्दच०। वृहत्यग्निदमनीदुःस्पर्शात्मके ५द्रव्ये राजनि०।

**त्रिकण्टक** पु० स्त्री लघुगर्गमत्स्ये त्रिका० समा० द्वि०। २कण्टकत्रये स्त्री। ततः परिमाणे रजता०अञ्। त्रैकण्टक तत्परिमाणे। त्रयः कण्टका अस्य। ३गोक्षुरवृक्षे पु० हेमच०।४कण्टकत्रयान्विते त्रि०।

**त्रिकद्रुक** पु०ज्योतिर्गौरायुरित्येतन्नामके "अभिप्लवाहस्त्रिके "अभिप्लवत्र्यहं पूर्वं त्रिकद्रुका इत्याचक्षते" आश्व०श्रौ०११। १।११त्रिकद्रुकेषु पाहि सोममिन्द्र!" ऋ०२।११।१७"त्रिकद्रुकेषु ज्योतिर्गौरायुरित्येतन्नामकेषु आभिप्लविकेष्वहःसु : भा० "त्र्यहार्थे ज्योतिर्गौरायुरिति त्रिकद्रुकाः" कात्या० श्रौ० २४।३।८ त्रिकद्रुक इति ज्योतिरादीनां समुदितानां संज्ञा संव्यवहारार्था" कर्कः "त्रिकद्रुकाः पृष्ठावलम्ब्य इति पशुकामस्य" आश्व० श्रौ० ।१०।३।१८।

**त्रिकर्म्मन्** पु० त्रीणि कर्म्माण्यस्य। यजनं याजनञ्चैव तथा दानप्रतिग्रहौ। अध्यापनञ्चाध्ययनं षट्कर्मा धर्मभाग् द्विजः" भा० अनु० १३१ अ०। उक्तेषु षट्सु कर्मसु मध्ये वृत्त्यर्थयाजनप्रतिग्रहाध्यापनभिन्नाद्वृत्त्यर्थदाने-ज्याध्ययनरूपकर्मकारिणि द्विजे। "त्रैविद्यो ब्राह्मणो विद्वान् न चाध्ययनजीवकः। त्रिकर्मा त्रिपरिक्रान्तो मैत्र एष स्मृतः द्विजः" भा० अनु० १४१ अ०।

**त्रिकश** न० त्रिसृणां कशानां तदाघातानां समाहारः। कशाघातत्रये। कशाघातत्रिकञ्च कशशब्दे १८३४पृ०दर्शितम्।

**त्रिकशूल** न० ६त०। वातजन्ये त्रिकस्थे व्यथाभेदे। "स्फिगस्थ्नोः पृष्ठवंशास्थ्नोर्यः सन्धिस्तत्त्रिकं स्मृतम्। तत्र वातेन या पीडा त्रिकशूलं तदुच्यते" भावप्र०।

**त्रिका** स्त्री त्रिधा कायति कै–क। कूपसमीपस्थे जलोद्धारके त्रिदारुमये यन्त्रभेदे चीरस्वामी।

**त्रिकाण्ड** पु० त्रीणि काण्डान्यस्य। स्वर्गवर्गादिकाण्डभूमिवर्गादिकाण्डसामान्यकाण्डरूपात्मके नामलिङ्गानुशासने अमरसिंहकृते १कोषभेदे तस्यैव शेषभूतस्त्रिकाण्डशेषः पुरुषोत्तमकृतः यथाह तदुपोद्घाते "अलौकिकत्वादमरः स्वकोषे न यानि नामानि समुल्लिलेख। विलोक्य तैरप्यधुना प्रचारमयं प्रयत्नः पुरुषोत्तमस्य"। २निरुक्ते तदपि त्रिकाण्डं तच्चानुक्रमणिकाभाष्ये दर्शितम् यथा "आद्यं नैघण्टुकं काण्डं द्वितीयं नैगमं तथा। तृतीयं दैवतं चेति समाम्नायस्त्रिधा मतः"। त्रयाणां काण्डानां समाहारः ङीप्। त्रिकाण्डी ३काण्डत्रये स्त्री। त्रीणि काण्डानि प्रमाणमस्य मात्रच् द्विगोस्तस्य लुकि च्चेतपरत्वे ङीप् त्रिकाण्डी च्चेतभक्तिः। त्रिकाण्डमिते रज्ज्वादौ स्त्री टाप्।

**त्रिकाय** पु० त्रयः काया अस्य त्रिकं दुःखत्रिकमेत्यस्मात् इ–अपादाने अच् वा। बुद्धदेवे हेमच०।

**त्रिकार्षिक** न० कर्षाय हितम् ठक् त्रयाणां वातपित्तकफानां कार्षिकम्। नागरातिविषामुस्तात्मके मिलिते औषधभेदे राजनि०।

**त्रिकाल** न० त्रयाणां कार्य्यकालभूतभविष्यत्कालानां समाहारः। १भूतभविष्यद्वर्तमानकालत्रये २प्रातर्मध्याह्नरूपकालत्रये च। "त्रिकालं पूजयेद्देवीम्" इति तन्त्रम्। त्रिकालज्ञः। त्रयः काला अस्य। ३कालत्रयवर्त्तिनि त्रि०। साम्प्रतकालं बाह्यं त्रिकालमाभ्यन्तरं करणम्" सां० का०। करणस्य मनसः त्रिकालबुद्ध्यादिसाधनत्वं यथा "नदीपुरभेदादभूद्वृष्टिः, अस्ति धूमादग्निरिह नगनिकुञ्जे, असत्युपघातके पिपीलिकाण्डसञ्चरणाद्भविष्यति वृष्टिरिति। तदनुरूपास्य सङ्कल्पाभिमानाध्यवसाया भवन्ति" सां० कौ०।

**त्रिकालज्ञ** पु० त्रिकालवर्त्तिपदार्थान् जानाति ज्ञा–क। १सर्वज्ञे त्रिकालविदादयोऽप्यत्र। २भूतभविष्यद्वर्त्तमानकालाभिज्ञे त्रि०। "युद्धं यथा यदा वा भविष्यदादिश्यते त्रिकालज्ञैः" इ०स० १७ अ०। त्रिकालवेत्ताप्यत्र।